# Atmanathastutih Rudrakrita

# આત્મનાથસ્તુતિઃ રુદ્રકૃતા

## Document Information

Text title : Atmanathastutih 2

File name : AtmanAthastutiH2.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# આત્મનાથસ્તુતિઃ રુદ્રકૃતા

ચતુર્વેદપુરીશાય શાશ્વતાયાદિમૂર્તયે ।
આત્મનાથાય જગતાં ગુરવે બ્રહ્મણે નમઃ ॥ ૧॥

સદ્ઘનાનન્દકન્દાય ચિદાનન્દસ્વરૂપિણે ।
કુન્દભૂરુહવાસાય ગુરવે બ્રહ્મણે નમઃ ॥ ૨॥

વિધાતૃહરિમુખ્યાનાં વિશ્વેષાં જગતામપિ ।
જ્ઞાનદાત્રે સુમહતે ગુરવે બ્રહ્મણે નમઃ ॥ ૩॥

અણોરણીયસે તસ્મૈ મહતશ્ચ મહીયસે ।
તુર્યાતીતાય શુદ્ધાય ગુરવે બ્રહ્મણે નમઃ ॥ ૪॥

સ્રષ્ટું વિધાતૃરૂપાય રક્ષિતું વિષ્ણુરૂપિણે ।
સંહર્તું કાલરૂપાય ગુરવે બ્રહ્મણે નમઃ ॥ ૫॥

વિધિવિશ્વમ્ભરાભીષ્ટપ્રદાબ્જચરણાય તે ।
વિશ્વાતીતાય વિશ્વસ્મૈ ગુરવે બ્રહ્મણે નમઃ ॥ ૬॥

સહસ્રશિરસે તુભ્યં સહસ્રાક્ષિભુજાઙ્ઘ્રયે ।
સહસ્રાગમવેદ્યાય ગુરવે બ્રહ્મણે નમઃ ॥ ૭॥

પઞ્ચાનનાય દેવાય પઞ્ચબ્રહ્મસ્વરૂપિણે ।
પઞ્ચાક્ષરસ્વરૂપાય ગુરવે બ્રહ્મણે નમઃ ॥ ૮॥

મદ્ભર્ત્રે જગતાં પિત્રે કારણત્રયહેતવે ।
નમસ્તુભ્યં નમસ્તુભ્યં નમસ્તુભ્યં નમો નમઃ ॥ ૯॥

અપરાધાયુતોપેતં મહાકલ્મષમાનસમ્ ।
પાહિ માં પાહિ માં નિત્યં પાહિ મામાત્મનાયક ॥ ૧૦॥

રુદ્રેશકથિતં સ્તોત્રં દશકં યઃ પઠેત્ પુમાન્ ।
કાલમૃત્યુમતિક્રમ્ય સ ચિરાયુઃ સુખી ભવેત્ ॥ ૧૧॥

ઇતિ શ્રીરુદ્રકૃતા આત્મનાથસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

Tirupperunthurai (also called the Athmanathaswamy temple) is located in Avudaiyarkoil village, near Aranthangi in the Pudukkottai district of Tamil Nadu. It was built to honor Lord Shiva. The presiding deity is formless (Atmanatar); there is no Śivalingam but only a pedestal (AvudayAr) located in the sanctum, hence the name Avudayar Koil. The God faces South in this temple- in Dakshinamurthy or Guru form. His consort is worshipped as SivayoganAyaki (YogAmbAl) in iconless form. There is no Nandi bull icon as is conventional in almost all Shiva temples.

There is deep spiritual significance in this. Hinduism allows deity worship for the novice. As one's devotion matures, one begins to contemplate the truth of formlessness of the Brahman. The temple has been designed to illustrate this theology. This one of the rarest Saivite shrines in whole of India to portray the supreme truth symbolically. Since the soul (athma) has no form, the deity is called Athmanathar.

Legend has it that Manickavasagar, one of the four Saivite savants, constructed the temple at Avudaiyarkoil.

*Atmanathastutih Rudrakrita*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*